नायं शशी निहन्ता स्याद् कारयेत्पापनिष्फलम् ।
ज्ञातव्यानि द्वन्द्वजस्य फलान्येतानि सूरिभिः ॥

अन्वयः – अयं शशी निहन्ता न स्याद् पापं निष्फलं कारयेत् । एतानि द्वन्द्वजस्य फलानि ज्ञातव्यानि इति सूरिभिः कथ्यते ।

क्षेमङ्करी – यह चन्द्रमा मारक ग्रह होकर भी मारक नहीं होता है, केवल पापग्रह को निष्फल कराता है ।

कर्क लग्नोद्भव जातस्य मारकादिविचारमाह —

भार्गवेन्दुसुतौ पापौ भूसुताङ्गिरसौ शुभौ ।
एक एव भवेत्साक्षाद्भूसुतो योगकारकः ॥

अन्वयः – कर्कलग्नोद्भवानां जातानां भार्गव-इन्दुसुतौ पापौ भूसुत-अङ्गिरसौ शुभौ स्तः । तत्र एक एव भूसुतः साक्षात् योगकारकः स्यात् ।

क्षेमङ्करी – कर्क लग्न में जन्म लेने वाले जातको के लिए शुक्र और बुध पाप ग्रह है। मंगल और गुरु शुभ ग्रह हैं। एक ही मंगल योगकारक होता है।

निहन्ता कविरन्ये तु पापिनो मारकाह्वयाः ।
कुलीरसंभवस्यैवं फलान्यूह्यानि सूरिभिः ॥

अन्वयः – निहन्ता कविरस्ति । अन्ये पापिनो तु ग्रहाः मारकाह्वयाः सन्ति । एवं प्रकारेण कुलीरसम्भवस्य फलानि सूरिभिः ऊह्यानि ।

क्षेमङ्करी – यहाँ केवल शुक्र मारक होता है और अन्य पापग्रह कष्टदेने वाले होते हैं ।

डॉ० सुदिवर कुमार
सहा० प्राचार्य (ज्योतिष)
रा० उ० सं० महावि० सुखासेना,
पूर्णियाँ ।

वस्तुनिष्ठप्रश्नाः

शास्त्री-I, II

08.09.20
3

(1) जन्मराशिगतः को ग्रहः विषाग्निभयं जनयति?

उत्तरम्- शनिः।

(2) जन्मराशिगतः को ग्रहः स्थाननाशं कार्यनाशञ्च करोति?

उत्तरम् - गुरुः।

(3) स्वराशितः सप्तमराशिगतः को ग्रहः सर्वं सुखं ददाति?

उत्तरम्- गुरुः।

(4) स्वराशितः द्वितीयराशिगतः को ग्रहः धनं धान्यं सन्ततिञ्च ददाति?

उत्तरम्- शुक्रः।

(5) स्वराशितः सप्तमभावस्थगतः को ग्रहः स्त्री-पुत्रहीनत्वं करोति?

उत्तरम्- शनिः।

(6) को ग्रहः राशेरादिरन्त्ये च शुभं करोति?

उत्तरम् - बुधः।

(7) कौ ग्रहौ राशेः पूर्वार्द्धे शुभफलदौ?

उत्तरम्- रवि-भौमौ।

(8) कुत्र गतो ग्रहः अशुभफलदः?

उत्तरम्- शत्रुराशिगतः।

(9) नृपाग्निपशुकर्माणि युद्धकार्याणि यानि च।
सूर्यस्य दिवसे प्राज्ञस्तानि सर्वाणि कारयेत्॥
कुत्रेदं वाक्यम्?

उत्तरम् - समाससंहितायाम्।

(10) 'नृपप्रतिष्ठासुखयुद्धयोधहेमाग्निगोमूत्रविषप्रयोगान्'
कस्येदं वाक्यम्?

उत्तरम्- यवनेश्वरस्य।

डॉ० सुधीर कुमार
सहा० प्राचार्य (ज्योतिष)
रा० उ० सं० महावि० सुखसेना,
पूर्णियाँ।

उपशास्त्री 08.09.20

वृषोद्भव जातकस्य मारकादि विचारमाह—

जीवशुक्रेन्दवः पापाः शुभौ शनिशशी सुतौ।
राजयोगकरः साक्षादेक एव रवेः सुतः ॥

अन्वयः— वृष लग्नोद्भवानां जातकाणां जीव-शुक्र-इन्दवः पापाः, शनि-शशी सुतौ शुभौ भवतः तत्र रवेः सुतः एक एव साक्षात् राजयोगकरः स्यात्।

क्षेमङ्करी— वृष लग्न में जन्म लेने वाले जातकों का गुरु, शुक्र और चन्द्र अशुभ शनि और बुध शुभ ग्रह हैं, वहीं एक ही शनि स्वयं राजयोगकारक होता है।

जीवाद्यो कुजः पापाः सन्ति मारकलक्षणाः।
रविः समो फलान्येवं ज्ञेयानि वृषजन्मनः ॥

अन्वयः— पापाः कुजः जीवाद्यः ग्रहाः मारकलक्षणाः लक्षितः सन्ति। तत्र रविः समः अस्ति। एवं वृषजन्मनः फलानि ज्ञेयानि।

क्षेमङ्करी— मंगल, गुरु, शुक्र और चन्द्र पापी ग्रह मारक लक्षणों से युक्त हैं। वहीं सूर्य सम है।

मिथुनोद्भव जातकस्य मारकादिविचारमाह—

भौमजीवारुणाः पापा एक एव कविः शुभः।
शनैश्चरेण जीवस्य योगो मेषभवो यथा ॥

अन्वयः— मिथुनलग्नोद्भवजातकस्य भौमजीव अरुणाः पापाः तत्र एक एव कविः शुभः ग्रहः स्यात्। शनैश्चरेण जीवस्य योगः मेष (लग्न) उद्भव यथा मन्यते विद्भिः।

क्षेमङ्करी— मिथुन लग्न में जन्म लेनेवाले जातकों के लिए मंगल, गुरु और सूर्य पाप ग्रह हैं। एक ही शुक्र शुभ ग्रह है मेष राशि की तरह जैसे शनि से युत गुरु पापग्रह माना गया है।

P.T.O